# Kailasachaturdvarasthalingabhidhanam 2

# कैलासचतुर्द्वारस्थलिङ्गाभिधानम् २

## Document Information

Text title : Kailasachaturdvarasthalingabhidhanam 2

File name : kailAsachaturdvArasthalingAbhidhAnam2.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | mAheshvarAkhyaH prathamAMshaH | adhyAyaH 41 - kailAsadakShiNadvAraliNgAbhidhAnam | 2-44||

Latest update : December 17, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 20, 2023

*sanskritdocuments.org*

# कैलासचतुर्द्वारस्थलिङ्गाभिधानम् २

(कैलासदक्षिणद्वारस्थलिङ्गाभिधानस्तोत्रम् २)

ईश्वरः -
अघोरेशः कपालीशः कुक्कुरेशोऽनलेश्वरः ।
इन्द्रेश्वरो यमेशश्च नैर्ऋतीशो नभेश्वरः ॥ २॥

उदावर्तीश्वरश्चैव दक्षिणावर्तकेश्वरः ।
विकुण्ठेशः कुठारेशो मानवेशः कुलेश्वरः ॥ ३॥

जापकेशो मौलिकेशश्चार्जुनेशः कनीश्वरः ।
भगदन्तेश्वरश्चैव नहुषेशोऽमृतेश्वरः ॥ ४॥

तङ्गणेशश्च सन्धीशो मध्यमेशो गलेश्वरः ।
विद्येश्वरः पन्नगेशः क्रथनेशो निशेश्वरः ॥ ५॥

दिवोदासेश्वरो राथीरथेशश्शौनकेश्वरः ।
गणभद्रेश्वरश्चैव शेषेशो वासुकीश्वरः ॥ ६॥

शङ्खपालेश्वरश्चैव चित्रगुप्तेश्वरस्तथा ।
दण्डपाणीश्वरश्चैव दुर्गेशस्सारसेश्वरः ॥ ७॥

हंसेश्वरो मयूरेशश्चक्रवाकेश्वरस्तथा ।
मन्थानेशो मन्मथेशोरतीशो गन्धकेश्वरः ॥ ८॥

भाण्डीरेशो वनेशश्च पुरन्ध्रीशः फलेश्वरः ।
कारणेशस्तारणेशः कृत्तिवासेश्वरस्तथा ॥ ९॥

जनार्दनेशो विश्वेशो महाकालेश्वरस्तथा ।
सरस्वतीशो लक्ष्मीशश्शचीशश्शक्रकेश्वरः ॥ १०॥

पुलहेशः पुलस्त्येशो वृद्धकालेश्वरस्तथा ।
भारद्वाजेश्वरश्चैव सागरेशो रमेश्वरः ॥ ११॥

विलेखनेश्वरश्चैव चित्रेशः (बिल्वेशः) पादकेश्वरः ।
पिण्डारेशो वसीशश्च तिलकेशो ध्रुवेश्वरः ॥ १२॥

भवेश्वरो(बभ्रेशो)ऽर्णवेशश्च क्षीभ्रणीशो दलेश्वरः ।
करन्धमेशः कृष्णेशो रमेशः कैर्ण(पर्ण)केश्वरः ॥ १३॥

गङ्गाधरेशो मौनेशः कुरुभद्रेश्वरस्तथा ।
कन्दलेशश्च सालेशस्तालेशो बिल्वकेश्वरः ॥ १४॥

अप्सरेशो मोक्षकेशो भूदारेशः पथेश्वरः ।
विराधेशः कोङ्कणेशो रभसेशश्चलेश्वरः ॥ १५॥

हरिद्रेशः कुङ्कुमेशो नरकोत्तारणेश्वरः ।
सुखेश्वरो ज्ञानकेशो भक्तीशो मुक्तिकेश्वरः ॥ १६॥

ऋणमोचेश्वरश्चैव कान्तीशः पावनेश्वरः ।
(ऋणमोचनेशः कान्तीशो धर्मेशः पावनेश्वरः) ।
पवनेशः पुरञ्जेशो गोकर्णेशो वटेश्वरः ॥ १७॥

शालिकेशो विशालेशो वीतिहोत्रेश्वरस्तथा ।
विश्वेश्वरश्च भीमेशश्शङ्करेशोऽमितेश्वरः ॥ १८॥

पारिजातेश्वरश्चैव मन्दारेशो जटेश्वरः ।
त्रिजटेशश्शिखण्डीशो बर्हीशः पनसेश्वरः ॥ १९॥

फणामणीश्वरो देवि रामेशो लक्ष्मणेश्वरः ।
अरुन्धतीशो वागीशः पद्मगर्भेश्वरस्तथा ॥ २०॥

हरिन्मणीशो भक्ष्येशः कुशलीशस्तरीश्वरः ।
उद्दालकेश्वरो नक्तञ्चरेशोऽपर्णकेश्वरः ॥ २१॥

शाण्डिल्येशश्छागलेशो निरिच्छेशः कुशेश्वरः ।
दूर्वेश्वरोऽनमित्रेशः कर्कन्धेशोऽगुणेश्वरः ॥ २२॥

कुरुविन्देश्वरश्चैव पट्टीशः कुटजेश्वरः ।
श्रीशैलेशो गणेशश्च हरिद्वारेश्वरस्तथा ॥ २३॥

गङ्गाद्वारेश्वरश्चैव कुरुक्षेत्रेश्वरस्तथा ।
सुराभाण्डेश्वरश्चैव ययातीशः कुथेश्वरः ॥ २४॥

वाराणसीश्वरश्चैवाप्यविमुक्तेश्वरस्तथा ।

कालहस्तीश्वरश्चैव विष्णुचक्रप्रदेश्वरः ॥ २५॥

रोमन्थेशोऽप्यगस्त्येशो मालवेशो भगेश्वरः ।
अङ्कोलेशः प्रधानेशो मारुतेशो भवेश्वरः ॥ २६॥

नक्षत्रेशस्तालकेशो भल्लिकेशः कुहेश्वरः ।
रोगहारीश्वरश्चैव त्रिजटेशो घनेश्वरः ॥ २७॥

सुपर्णेशस्ताण्डवेशो मण्डलेशो मतीश्वरः ।
तक्षकेशः प्रवालेशो हरिभद्रेश्वरस्तथा ॥ २८॥

विरोधेशस्तुम्बुरेशो नारदेशो गरेश्वरः ।
रम्येश्वरो विद्रुमेशः कर्दमेशस्तृणेश्वरः ॥ २९॥

शूलटङ्केश्वरचैव छद्मकेशो वलीश्वरः ।
मरुधामेश्वरश्चैव सिन्धूरेशो घृणीश्वरः ॥ ३०॥

व्रातेश्वरः प्रयागेशः प्रतिष्ठानपुरेश्वरः ।
गोदावरीश्वरचैव ताम्रपर्णीश्वरस्तथा ॥ ३१॥

मरुद्वृधेश्वरश्चैव पम्पेशः पङ्क्लेश्वरः ।
फेनेशो बुद्बुदेशश्चाप्यावर्तेशस्सुमेश्वरः ॥ ३२॥

कुलेश्वरो विराटेशः पलाशेशस्स्थितीश्वरः ।
प्रलयेशो जाग्रदीशस्त्रिलोकेशः क्षितीश्वरः ॥ ३३॥

पञ्चकेशो व्रतीशश्च यज्ञेशो दुम्बरेश्वरः ।
बालीशश्चैव पालीशः पलीशो बभ्रवेश्वरः ॥ ३४॥

गन्धद्वारेश्वरश्चैव घण्टेशो वरुणेश्वरः ।
प्रभासेशः पुष्करेशो रुद्रकोटीश्वरस्तथा ॥ ३५॥

वल्मीकेशस्सुन्दरेशस्तृणज्योतीश्वरस्तथा ।
गायत्रीशस्सवित्रीशः कालद्वारेश्वरस्तथा ॥ ३६॥

तुङ्गेशो भीमचण्डेशो रत्नगर्भेश्वरस्तथा ।
देवेश्वरो हीरकेशो रन्तिदेवेश्वरस्तथा ॥ ३७॥

कालञ्जरेश्वरोऽब्धीशः पैप्पलादेश्वरस्तथा ।
गन्धर्वेशस्त्रिशूलेशो रजनीशो दिनेश्वरः ॥ ३८॥

चित्रघण्टेश्वरश्चैव द्वारपीठेश्वरस्तथा ।
त्रिकूटेशो मङ्गलेशस्तथैवामलकेश्वरः ॥ ३९॥

मुद्रेशस्ताटकेशश्च त्रिदण्डीशोऽगजेश्वरः ।
कात्यायनीश्वरश्चैव याज्ञवल्क्येश्वरस्तथा ॥ ४०॥

त्वष्ट्रेशो विश्वकर्मेशो यमेशो रथकेश्वरः ।
वसुन्धरेश्वरश्चैव क्षौमेशो नालकेश्वरः ॥ ४१॥

मित्रेश्वरश्च कर्त्रीशः (कण्ठेशः) काव्येशो विबुधेश्वरः ।
भौमेश्वरो भर्तृकेशः करहट्टेश्वरस्तथा ॥ ४२॥

गृध्रेशः कङ्कतीशश्च काव्येशस्स्वर्णदेश्वरः ॥ ४३॥

- -

एतानि दिव्यमणिधामगतानि देवि लिङ्गानि याम्यसुभगोद्यतसोममौलि ।
चन्द्रोपलाकलितलिङ्गततीनि पश्य चाग्नेयनैरृततततानि शिवेऽघहन्तृ ॥ ४४॥

॥ इति शिवरहस्यान्तर्गते माहेश्वराख्ये कैलासचतुर्द्वारस्थलिङ्गाभिधानम् -
१ - कैलासदक्षिणद्वारस्थलिङ्गाभिधानस्तोत्रम् ॥

- ॥ श्रीशिवरहस्यम् । माहेश्वराख्यः प्रथमांशः । अध्यायः ४१ - कैलासदक्षिणद्वारलिङ्गाभिधानम् । २-४४॥

- .. shrIshivarahasyam . mAheshvarAkhyaH prathamAMshaH . adhyAyaH 41 - kailAsadakShiNadvAralingAbhidhAnam . 2-44..

Notes:
Īśvara ईश्वर lists the names of the several Śivaliṅga-s शिवलिङ्ग around Kailāsa कैलास in the Four Cardinal direction - among which are the Śivaliṅga-s शिवलिङ्ग at the Southern Gate spanning from āgneyakoṇa आग्नेयकोण (South East) to the nairṛtyakoṇa नैर्ऋत्यकोण (South West). He mentions to Devī देवी; at the conclusion of the list of the Northen Gate, the merits of worshipping and reciting the names of all of the four groups of Śivaliṅga-s शिवलिङ्ग.

Encoded and proofread by Ruma Dewan

*Kailasachaturdvarasthalingabhidhanam 2*

pdf was typeset on December 20, 2023

Please send corrections to *sanskrit@cheerful.com*